स्स्कृतस्वाध्यायः

संस्कृतकक्ष्या -II

चतुर्थी

पर्वताः सन्ति । फलानि सन्ति । पुष्पाणि सन्ति । नद्यः सन्ति । बालिकाः नृत्यन्ति ।

छात्राः - अहो । किम् अद्य कक्ष्यायां बहूनि चित्राणि सन्ति । गजाः सन्ति वृषभाः सन्ति । वृक्षाः सन्ति ।

आचार्या - सर्वे आगतवन्तो वा ?

छात्राः - आम् सर्वे आगतवन्तः ।

आचार्या -अद्य एतानि चित्राणि सन्ति खलु । अहं सर्वेभ्यः ददामि । यस्य नाम वदामि सः उत्तिष्ठतु । फलचित्रं प्रभाकराय ददामि । नदीचित्रं लतायै ददामि । वृक्षचित्रं एतस्मै बालकाय ददामि । पर्वतचित्रं भारत्यै ददामि ।

रञ्जिता - मान्ये । मह्यं गजचित्रं ददातु ।

दिनेशः - तस्यै वृषभचित्रं ददातु । गणेश । तुभ्यं बालिकाचित्रं आचार्या दत्तवती वा ? मान्ये फलचित्रं मास्तु फलमेव ददातु ।

आचार्या - चित्रायै किमपि न ददामि । सा कोलाहलं करोति ।

चित्रा - अहं कोलाहलं न करोमि ।

आचार्या - अस्तु । स्वीकरोतु । भवन्तः सर्वे स्व-स्व चित्राणि पश्यन्तु । पञ्च-पञ्च वाक्यानि संस्कृत भाषया लिखन्तु ।